संस्कृतवार्ता:

30.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य मुम्बई-नगर्यां ग्लोबल-फिनटेक-फेस्ट-इत्याख्ये महोत्सवे भारतदेशस्य फिनटेककौशलं प्रतिपादितवान्, उक्तवान् च यत् वित्तीयसेवा: सुदृढीकर्तुं फिनटेकइत्यनेन क्षेत्रेण महत्वपूर्णभूमिका निभालिता।

· प्रधानमन्त्री महाराष्ट्रस्य पालघर-जनपदे वाधवन-जलपोतस्थानकस्यापि आधारशिलां स्थापितवान् ।

· विदेशमन्त्री डॉ एस्. जयशङ्कर: अद्य प्रोक्तवान् यत् पाकिस्तानदेशेन सह साम्प्रतं निर्बाधिगतवार्ताया: युग: अवसीयते। यतो हि कार्याचरणस्य परिणामा: भवन्ति इति।

· पेरिसनगरे प्रचल्यामानासु पैरालम्पिकक्रीडासु भारतस्य अवनि-लेखराइत्येषा महिलानां दशमीटरात्मक्यां एयर-राइफल-प्रतिस्पर्धायां स्वर्णपदकं विजितवती, तत्रैव मोनाअग्रवाल: अष्टाविंशत्यधिकद्विशतं दशमलव सप्त इति अङ्कै: सह कांस्यपदकं समर्जितवती।

<u>प्रधानमन्त्री महाराष्ट्र-यात्रा</u>

प्रधानमन्त्री नरेन्द्र मोदी अद्य महाराष्ट्रस्य मुम्बई-नगर्यां ग्लोबल-फिनटेक-फेस्ट-महोत्सवे चतुर्विंशत्यधिक-द्विसहस्रतमे अस्मिन् वैश्विक-समारोहे भारतदेशस्य फिनटेक-प्रगतिविषयं प्रति ध्यानाकर्षयित्वा अवदत् भारतस्य फिनटेक इति सम्पूर्णे विश्वे जनजीवनस्य सुगमतायै कार्यं कोरति। स: उक्तवान् भारतद्वारा फिनटेक इति इदं स्वीकरणं गति-माप- दृष्ट्यो: विश्वे अन्यतमम् अस्ति। एतेन कारणेन समग्रस्य विश्वस्य तात्कालिकं प्राविधिक-क्रयं-विक्रयं इति भारते जातम् अस्ति। भारतदेशे ‘फिनेटक’ इत्यनेन माध्यमेन यत् परिवर्तनम् अभवत् एतत् केवलं प्रौद्योगिकपर्यन्तं सीमितं नास्ति। इत्यस्य सामाजिक-प्रभावं अति व्यापकम् अस्ति। फिनटेक-द्वारा ग्राम-नगरयो: मध्ये व्यापक-दूरीं दूरीकर्तुं सेतो: निर्माणस्य कार्यम् कृतम्। श्री मोदी अवदत् फिनटेक इत्यस्य वित्तीयसेवानां लोकतन्त्रीकरणे महती भूमिका अस्ति।

तदन्तरं प्रधामन्त्री राज्यस्य पालघरजनपदे वाधवन-जलपोतस्थानकस्यापि आधारशिलां स्थापितवान्। असौ विभिन्नासां मत्स्यपालन-परियोजनानामपि उद्घाटनं विहितवान् अथ च मत्स्यपालकेभ्य: धीवरेभ्य: नियन्त्रणोपकराणि कृषक-ऋण-प्रपत्रं च वितरितवान्। अत्रावसरे प्रधानमन्त्री प्रावोचत् यत् विगतेषु दशवर्षेषु भारतस्य तटेषु विकासेनापि जलपोत-स्थानकानां आधुनिकीकरणं कृतम्, अपि च जलमार्गा: विकसिता:। अस्मिन् दिशि लक्षात्मक-कोटिरूप्काणां निवेश: अपि जात:। येन युवभ्य: लाभ: नवीनावसरा: मेलिष्यन्ति।

जयशङ्कर:- पाकिस्तानदेश:

विदेशमन्त्री डॉ एस्. जयशङ्कर: अद्य प्रोक्तवान् यत् पाकिस्तानदेशेन सह निर्बाधिगतवार्ताया: युग: अवसीयते। तेन सबलं प्रतिपादितं यत् कार्याचरणस्य परिणामा: भवन्ति। डॉ. जयशङ्कर: वार्तां नवदिल्ल्यां एकस्य पुस्तकस्य विमोचन-समारोहे उक्तवान्। असौ भणितवान् यत् भारतं केषुचिदपि प्रसङ्गेषु निष्क्रियं नास्ति। बाङ्गलादेशस्य प्रसङ्गं अवलम्य विदेशमन्त्रिणा निगदितं यत् पारस्परिक कल्याणाय भारतेन ध्यानं प्रदीयते। मालदीवदेशेन सह भारतस्य सम्बन्धेषु डॉ. जयशङ्कर: प्रोदीरितवान् यत् मालदीवदेशं प्रति भारतस्य दृष्टिकोणे वैषम्यतास्तिा समावेशि-देशै: प्रत्येकं देशस्य स्थिति: वैषम्ययुता एव भविष्यति।

भारत-चीन-देशौ

सीमवर्तिषु क्षेत्रेषु शान्तिं स्थापयितुं भारत-चीन-देशौ निर्णयम् अकुरूतां । उभौ देशौ पुनः उक्तवन्तौ यत् पुनःस्थापनं, वास्तविकनियन्त्रणरेखायाः सम्मानं द्वैपाक्षिकसम्बन्धेषु सामान्यस्थिते: पुनःस्थापनस्य आवश्यकम् आधारः अस्ति इति। भारत-चीन-सीम-विषयेषु परामर्शाय समन्वयाय च कार्य-तन्त्रस्य एक त्रिंशत्तमं सम्मेलनं ह्यः बिजिंग-नगरे समायोजितम्। विदेशमन्त्रालयस्य संयुक्तसचिवः पूर्व-एशियाया: गौरङ्गलालदासः भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं कृतवान्। विदेशमन्त्रालयानुसारि उभौ पक्षौ वास्तविक-नियंत्रण-रेखायां स्थितिं विषये मुक्तं, रचनात्मकं, दूरदर्शिनं च विचाराणांम् आदानप्रदानम् कृतवन्तौ, येन भिन्नाभिप्रायान् न्यूनीकर्तुं, प्रलंबितानां विषयाणां शीघ्रं समाधानम् अन्वेष्टुं च शक्यते।

## प्रधानमन्त्रि- न्यायपालिका

प्रधानमन्त्री नरेन्द्रमोदी श्व: प्रात: नवदिल्ल्या: भारतमण्डपमस्थाने जनपद-न्यायपालिकाया: राष्ट्रिय-सम्मेलनस्य उद्घाटनं करिष्यति। अत्रावसरे प्रधानमन्त्री सर्वोच्चन्यायालयस्य स्थापनाया: पञ्चसप्ततितमवर्षस्य सम्पूर्त्यवसरे प्रैष्यपत्रस्य मुद्राया: च अनावरणं करिष्यति। अवधेयं वर्तते यत् सर्वोच्चन्यायालयद्वारा आयोजिते एतस्मिन् द्विदिवासत्मके सम्मेलने आधारभूतसरञ्चनां समावेशि-न्यायालय-कक्षं न्यायिक-सुरक्षा प्रतिवेदनप्रबन्धनं प्रशिक्षणं च समाश्रित्य जनपद-न्यायपालिकाया: विषयेषु आश्रितानि पञ्चसत्राणि प्रमुखतया सुनिश्तिानि। औद्घघाटनिकसत्रे मुख्यन्यायाधीश: केन्द्रीय-विधिन्यायमन्त्री च उपस्थितौ भविष्यत:।

## प्रधानमन्त्री-वन्देभारतम्

प्रधानमन्त्री नरेन्द्र मोदी दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन श्व: अपराह्णे त्रिभ्य: वन्देभारत-रेलयानेभ्य: हरितध्वजं प्रदर्शयिष्यति। मेकइनइण्डिया-आत्मनिर्भर-भारत-इत्युपक्रमयो: अन्तर्गतं निर्मितानि एतानि त्रीणि वन्देभारतरेलयानानि त्रिषु मार्गेषु मेरठ-लखनऊ-मदुरै-बेंगलुरु-चेन्नै- नागरकोइल इत्येतेषु सम्पर्कसौविध्यं परिमार्जितं करिष्यन्ति। एतानि नवीनानि रेलयानानि त्रिषु राज्येषु यथा उत्तरप्रदेश-तमिलनाडु-कर्णाटकेषु जनेभ्य: यात्राया: विश्वस्तरीयसाधनं गतिं सौख्यं च प्रदास्यन्ति। अपि च नियमितयात्रिणां व्यापारिणां छात्रसमुदायानां अत्यावश्यकतां सम्पूरयितुं रेलसेवाया: एकस्य अभिनवस्य मानकस्यापि शुभारम्भं करिष्यिति।

## झारखण्ड – नवीनमन्त्री

झारखण्डराज्ये, हेमन्तसोरेनप्रशासने झारखण्डमुक्तिमोर्चादलस्य विधायक: रामदास-सोरेन: मन्त्रिपदभारं स्वीकृतवान्। घाटशिलात: विधायक: एष: राज्यमन्त्रिमण्डले पूर्वमुख्यमन्त्रिण: चम्पईसोरेनस्य स्थाने आगत:। राजस्य राजभवने संतोषकुमार-गंगवार: रामदाससोरेनाय मन्त्रिपदाय शपथवचनं प्रदत्तवान्। अत्रावधौ मुख्यमन्त्रिणं हेमन्तसोरेनं समेत्य अन्ये च जना: उपस्थिता: आसन्।

अतिवृष्टि:

भारतर्तुविज्ञान विभागेन आगामीषु त्रिषु दिवसेषु ओडिशा-तटीय-आन्ध्रप्रदेश- छत्तीसगढ-विदर्भ-तेलंगाना-क्षेत्रेषु अतीव-प्रचण्डवृष्टे: पूर्वानुमानं कृतम्। विभागेन उक्तम् यत् गुजरातस्य विदर्भस्य च केषुचित् स्थानेषु एतादृशी परिस्थिति: स्थास्यति तथा च कच्छ त्रे निर्मित: वायुप्रबलक्षेत्र: चक्रवाते परिवर्तित:। अद्य कच्छ क्षेत्रे प्रचण्डवृष्ट्या: सम्भावना अस्ति।

पैरालम्पिक क्रीडा

पेरिसनगरे प्रचल्यामानासु पैरालम्पिक क्रीडासु भारतस्य अवनि-लेखरा इत्येषा महिलानां दशमीटरात्मक्यां एयर राइफइल प्रतिस्पर्धायां स्वर्णपदकं विजितवती, तत्रैव मोनाअग्रवाल: अष्टाविंशत्यधिकद्विशतं दशमलव सप्त इति अङ्कै: सह कांस्यपदकं समर्जितवती। अपरत्र, लक्ष्यभेकद: क्रीडक: मनीषनरवाल: पुरूषाणां दशमीटरात्मके एयरपिस्टल इत्याख्यस्य द्वन्द्वस्य अन्त्यचक्रे समाविष्ट:।

।। इति वार्ताः।।